# सिद्धान्तबिन्दुः

राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
56-57, इन्स्टीटयूशनल एरिया, जनकपुरी
नई दिल्ली - 110058

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

भेदिभेदकविविधागमपारङ्गम श्रीमधुसूदनसरस्वतीकृत:

# सिद्धान्तबिन्दु:

पूज्यपादजगद्गुरुश्रीशङ्कराचार्यविरचितदशश्लोकीव्याख्यारूप:

श्रीगौडब्रह्मानन्दकृतन्यायरत्नावल्या-क्षीनारायणतीर्थकृत

लघुव्याख्यया च युत:

सौराष्ट्रान्तर्गत-धराङ्गधरावास्तव्यप्रथितयशोवैभव-मूलजीभट्टसूनुना काशीस्थ-राजकीयसंस्कृतपाठशालाया: सुवर्णपदकचतुष्टयोपलब्धिपूर्वकं समासादित-वेदान्ताचार्यपदवीकेन जामनगरस्थराजकीयपाठशालाप्रधानाध्यापकेन त्र्यम्बकरामशास्त्रिणा सङ्कलितया ग्रन्थान्तरस्थपाठभेदादिप्रदर्शयित्र्या टिप्पण्या विषयानुक्रमणिकया भूमिकया चोपस्कृत:, तेनैव संशोधितञ्च।

**राष्ट्रिय-संस्कृत-संस्थान**

मानित विश्वविद्यालय

५६-५७, इन्स्टीटयूशनल एरिया,

जनकपुरी, नई दिल्ली - ११००५८

॥ श्रीः ॥

# ईषत्प्रास्ताविकम् ।

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

हंहो विद्वन्मणयः !

अस्ति चात्र सकलभूमण्डलमण्डनायमानानां श्रद्धाराध्यसद्गुरूणां श्लथीकृतदृढग्रन्थीनां विपश्चिदपश्चिमानां पुरुषधौरेयाणां निश्चप्रचं वेदान्तदर्शनं स्वपरपुरुषार्थार्पकमिति शेमुषी। वेदस्य अन्तो बोधकतासम्बन्धेन तात्पर्यविषयो यत्रेति व्युत्पत्त्या यद्यपि 'तत्त्वमसी'त्यादिमहावाक्यानामेव वेदान्तत्वं तथापि 'वाक्यार्थबोधे पदार्थज्ञानं कारणम्' इति न्यायेन तदादिपदार्थशोधकस्य निखिलागमसारभूतस्य चतुर्लक्षण्यात्मकस्य शारीरकस्य तदनुकूलयुक्त्यादिसमर्पकत्वेन भामत्यादिनिबन्धानामपि वेदान्तत्वे नास्ति क्षतिः ।

वेदान्तदर्शने द्वैतविशिष्टाद्वैतविशुद्धाद्वैताद्वैतादिभेदस्य जागरूकत्वेपि 'परमं साम्यमुपैति' इति श्रुतिसमन्वयस्य विरोधात्, सम्भवत्याञ्चैकवाक्यतायां वाक्यभेदकल्पनस्यायुक्तत्वात्, अद्वैते ह्येकस्मिन्ननेकान्तर्भावस्य सुसम्पादत्वात्, अनेकत्वसिद्धेरेकत्वसिद्ध्यधीनत्वेन द्वैतस्याद्वैतनान्तरीयकत्वात्, अद्वैतसिद्धेरनन्याधीनत्वात्, अद्वैतमत एव सर्वासामुपनिषदां साक्षात्परम्परया वा तात्पर्यपर्यवसानमिति आचार्यादिभिः 'तत्तु समन्वयात्' इत्यत्र सुनिपुणं निरूपितत्वाच्च नेह प्रतन्यते ।

अस्मिन्दर्शने कियद्भिः सूरिभिर्लेखिनी सञ्चालितेति परिगणनं विबुधायुषापि दुःशकमिति नास्त्यतिशयोक्तिशङ्कागन्धोपि । जगतीतलेऽद्यावधि न बभूवैतादृशो दार्शनिककोविदो विदितयशा येन स्वयशोवतंसो वेदान्त एकोपि निबन्धो न निबद्ध इति । वैय्याकरणैः, किम्बहुना साहित्यरसिकैरालङ्कारिकैरपि जीवनान्तवेलायां जीवनसाफल्याय जीवात्मविचारे मनो नियुज्य सिद्धान्तलेशादयोऽपूर्वाः प्रबन्धाः प्रबद्धा इति बह्वन्युदाहरणानि सन्ति । तेनाद्य संस्कृतादिविविधासु वाक्षु पाणितलमलङ्कुर्वाणानि यावन्ति वेदान्तशास्त्रपुस्तकानि तावन्त्यन्यशास्त्रेऽद्यावधि कर्णाभ्यर्णमपि न समासादितानीति नाविदितं समेषाम् ।

अथवा निवृत्ताज्ञानत्वमपरोक्षत्वं तच्च चितोऽज्ञानविषयताशून्यत्वे सति चिद्रूपत्वम्, दृश्यानान्त्वज्ञानविषयतानवच्छेदकत्वे सति दृश्यत्वम्। तत्राद्ये विशेष्यदलं वक्ष्यमाणयुक्त्या स्वतोऽज्ञानाविषयस्य घटादेः सर्वदाऽपरोक्षव्यवहारवारणाय। विशेषणदलं त्वज्ञानाशकवृत्तेः पूर्वमपि साक्षिणोऽपरोक्षव्यवहारवारणाय। द्वितीये विशेष्यं विकल्पोल्लिखिते तुच्छेऽतिव्याप्तिवारणाय। सत्यन्तमाकाशादेः प्रत्यक्षत्ववारणाय। चिदाचितोर्द्वयोरपि कथितप्रकाराज्ञानशून्यत्वं तु प्रमासामग्र्यैव प्रमाकाले भवति 'तरति शोकमात्मवित्, विद्वान्नामरूपाद्विमुक्तः' इत्यादि श्रुतिभिः ज्ञानसमकालं मुक्त इति वृद्धोक्तिभिश्चाज्ञाननाशस्य ज्ञानसमकालिकत्वप्रतिपादनेन प्रमासामग्र्या एवाज्ञाननाशकत्वज्ञापनात्। सा च सामग्री इन्द्रियसन्निकर्षादिरूपा, योग्यत्वंपदार्थाभेदपरशब्दादितात्पर्यनिश्चयरूपा च। प्रमया तु प्राकट्यं विषयस्येति न प्रमाया अपि वैयर्थ्यमिति सङ्क्षेपः। ज्ञानस्यापरोक्षत्वं तु तादृशापरोक्षयोरन्यतराश्रयविषयकत्वम्। अथवा ज्ञानस्यापरोक्षत्वं तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वम्। अतीतसुखादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणम्। धर्मादिशाब्दबोधेऽतिव्याप्तिवारणाय योग्येति। सुरभि चन्दनमित्यादौ सौरभादेः प्रत्यक्षत्ववारणाय तत्तदिन्द्रियेति सङ्क्षेपः। अथवा सामान्यतो ज्ञातस्य विशेषतो ज्ञानार्थं मननापरपर्यायो विचारः तदनु निदिध्यासनं च सामान्यज्ञानमेव तत्तु निर्गुणत्वादिना प्रमाणायोग्यस्य कुतस्तत्राह—**तस्य चेति। प्रमापकं** शाब्दपरोक्षप्रमाजनकं निदिध्यासनं प्रति श्रवणस्य कारणताज्ञापनाय वाक्यमेवेत्येवकारः। श्रुतिभिरेवावगतस्य भावनासहकृतेन मनसाऽऽपरोक्ष्यम् 'मनसैवानुद्रष्टव्य'मिति श्रुतेरिति भावः। न च 'यन्मनसा न मनुते' इति श्रुतिविरोधः, भावनां विना मनोगम्यं न भवतीति तदर्थत्वात्। अन्यथा औपनिषदत्वमपि न स्यात् 'यतो वाचो निवर्तन्ते' इति श्रुतेः। तस्माद्यथा औपनिषदत्ववागगम्यत्वयोर्द्वयोरप्यविरोधाय शक्त्या वाचो निवर्तन्ते इत्येवार्थो न तु सर्वथा निवर्तन्ते एवेति तथा प्रकृतेपि 'मनसा न मनुते' 'मनसैवानुद्रष्टव्यम्' इति द्वयोरविरोधाय भावनां विना न कदाचिन्मनसा जानाति भावनायान्तु जानात्येवेत्यर्थः तथैवोपलब्धेरिति भावः। एतेन परोक्षत्वापरोक्षत्वयोः प्रमाणस्वभावकृतत्वेपि न हानिः, मनोरूपेन्द्रियजन्यत्वेन ब्रह्मज्ञानस्यापरोक्षत्वाभ्युपगमात्। एवं भावनाजन्यत्वेन व्यवहितकामिनीसाक्षात्कारवदप्रामाण्यमपि, अबाधितार्थत्वेन प्रामाण्यसम्भवात्।

अयमत्रनिष्कर्षः। शाब्दापरोक्षत्ववादिमते 'मनसैवानुद्रष्टव्य' मित्यत्र कर्तृत्वं तृतीयार्थो न करणत्वं 'यन्मनसा न मनुते' इति श्रुतिविरोधात्, औपनिषदसमाख्याविरोधाच्च। तथा च साधनचतुष्टयसम्पदनन्तरं श्रुतिकरणकमनःकर्तृकदर्शनविषय आत्मेति तत्रार्थः। योगजापरोक्षवादिमते तु शब्दादेव परोक्षं न मानान्तरात्, [औपनिषदसमाख्याविरोधात्] अपरोक्षं तु भावनासहकृतान्मनस एव, केवलस्य व्यभिचारित्वेन करणत्वासम्भवेपि योगसहकृतस्यायोग्यपरमाण्वादिप्रत्यक्ष इव कारणत्वे बाधकाभावात्। 'निदिध्यासितव्य'